श्री काळिकाष्टकं

श्री काळिकाष्टकं

ध्यानं –

गलद्रक्तमुंडावळीकंठमाला
महाघोररावा सुदंष्ट्रा कराळा |
विवस्त्रा श्मशानालया मुक्तकेशी
महाकालकामाकुला काळिकेयं || 1 ||

भुजेवामयुग्मे शिरोऽसिं दधाना
वरं दक्षयुग्मेऽभयं वै तथैव |
सुमध्याऽपि तुंगस्तना भारनम्रा
लसद्रक्तसृक्कद्वया सुस्मितास्या || 2 ||

शवद्वंद्वकर्णावतंसा सुकेशी
लसत्प्रेतपाणिं प्रयुक्तैककांची |
शवाकारमंचाधिरूढा शिवाभि-
-श्चतुर्दिक्षुशब्दायमानाऽभिरेजे || 3 ||

स्तुतिः –

विरंच्यादिदेवास्त्रयस्ते गुणास्त्रीन्
समाराध्य काळीं प्रधाना बभूवुः |
अनादिं सुरादिं मखादिं भवादिं
स्वरूपं त्वदीयं न विंदंति देवाः || 1 ||

जगन्मोहिनीयं तु वाग्वादिनीयं
सुहृत्पोषिणी शत्रुसंहारणीयं |
वचस्तंभनीयं किमुच्चाटनीयं
स्वरूपं त्वदीयं न विंदंति देवाः || 2 ||

इयं स्वर्गदात्री पुनः कल्पवल्ली
मनोजास्तु कामान् यथार्थं प्रकुर्यात् |
तथा ते कृतार्था भवंतीति नित्यं
स्वरूपं त्वदीयं न विंदंति देवाः || 3 ||

सुरापानमत्ता सुभक्तानुरक्ता
लसत्पूतचित्ते सदाविर्भवत्ते |
जपध्यानपूजासुधाधौतपंका
स्वरूपं त्वदीयं न विंदंति देवाः || 4 ||

चिदानंदकंदं हसन्मंदमंदं
शरच्चंद्रकोटिप्रभापुंजबिंबं |
मुनीनां कवीनां हृदि द्योतयंतं
स्वरूपं त्वदीयं न विंदंति देवाः || 5 ||

महामेघकाळी सुरक्तापि शुभ्रा
कदाचिद्विचित्राकृतिर्योगमाया |
न बाला न वृद्धा न कामातुरापि
स्वरूपं त्वदीयं न विंदंति देवाः || 6 ||

क्षमस्वापराधं महागुप्तभावं
मया लोकमध्ये प्रकाशीकृतं यत् |
तव ध्यानपूतेन चापल्यभावात्
स्वरूपं त्वदीयं न विंदंति देवाः || 7 ||

यदि ध्यानयुक्तं पठेद्यो मनुष्य-
-स्तदा सर्वलोके विशालो भवेच्च |
गृहे चाष्टसिद्धिर्मृते चापि मुक्तिः
स्वरूपं त्वदीयं न विंदंति देवाः || 8 ||

इति श्रीमच्छंकराचार्य विरचितं श्री काळिकाष्टकं ||